श्री रामसेन विदुषाव्यरच स्फुटोर्त्थम् ।।

Colophon : इदं पुस्तकं परिधावि मंवत्सरे उत्तरायणे अधिक आषाढ़मासे कृष्णपक्षे एकादश्यायां सौम्यवासरे द्वाविंश घटिकायां दिवा च वेणू-पुरस्त पन्नेचारीरित्तल विद्वत् वामनशर्मणा पंचम पुत्र भगवीति केशव शर्मणेन लिखितं समाप्तमित्यर्थः श्री जिनेश्वराय नमः।

देखें,—जि० र० को०, पृ० १५३।

३६७. तत्वार्थसार

Opening : मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम्।
ज्ञातारं विश्वतत्वानां वंदे तद्गुणलब्धये ।।

Closing : वर्णाः पदानां कर्तारो वाक्यानां तु पदावलिः ।
वाक्यानि चास्य शास्त्रस्य कर्तृणि न पुनर्वयम् ।।

Colophon : इति श्री अमृतसूरीणांकृतिः तत्वार्थसारोनाम मोक्षशास्त्रं समाप्तम् ।

देखें—(१) दि० जि० ग्र० र०, पृ० ७६ ।
(२) जि० र० को०, पृ० १५३ ।
(३) प्र० जै० सा०, पृ० १५० ।
(४) आ० सू०, पृ० ६६ ।
(५) रा० सू० II, पृ० १३३ ।
(६) रा० सू० III, पृ० १७६ ।
Catg. of Skt. & Pkt. Ms., P. 648.

३९८. तत्वार्थसार

Opening : देखें, क्र० ३९७ ।
Closing : देखें, क्र० ३९७ ।
Colophon : इति श्री अमृतचंद्रसूरीणां कृतिस्तत्वार्थसारोनाममोक्षशास्त्र-समाप्तम् । लिपिकृतम् बालमोकुन्दलाल अग्रवाला आरानग्र । श्रीरस्तु।

३९९. तत्वार्थसार

Opening : देखें, क्र० ३९७ ।
Closing : देखें, क्र० ३९७ ।
Colophon : इति अमृतचंद्र सूरीणां कृतिः तत्वार्थसारो नाम मोक्षशास्त्रं समाप्तम् ।

श्री काष्ठासंघे श्री रामकीर्तिदेवामुन्कन्दकीर्ति । ग्रंथश्लोक सख्या ७२४ । संवत् १५५३ वैशाख सुदी सोमे श्री काष्ठासंघे मापुर-गच्छे पुष्करगणे आर्यलपुरमध्ये लिखाप्तं ताइ ? कीर्तिदेवा. ।

४००. तत्वार्थसूत्र (श्रुतसागरी टीका)

Opening : देखें, क्र० ३८५ ।
Cosing : देखें, क्र० ३८५ ।

Colophon : इत्यनवद्यगद्यपद्यविद्याविनोदविनोदितप्रमोदपीयूषरसपानपावन-मतिसभाजरत्नराराजमतिसागर यतिराजराजितार्थनसमर्थेन तर्कव्याकरण छंदोलकारसाहित्यादि शास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्ति भट्टारकप्रशिष्येण चशिष्येण सकलविद्वज्जन विरचितचिरसो सेवस्य श्री विद्यानंदिदेवस्य संछर्दित मिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिक राजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचंद्रोदय प्रमेयकमलमार्तण्ड प्रचंडाष्टसहस्त्री प्रमुखग्रंथ संदर्भनिर्भरावलोकनबुद्धिविराजितायां तत्वार्थटीकायां दशमोध्यायः समाप्तः। इति तत्वार्थस्य श्रुतसागरी टीका समाप्ता। संवत् १७७० माघमासे शुक्लपक्षे तिथौ सप्तम्यां रविवासरे पाटलिपुरे लिखितम् अमीसागरेण आत्मार्थे। श्री। श्री।

देखें—दि. जि. ग्र. र., पृ. ८५।
जि. र. को., पृ. १५६ (१५)।
आ० सू० पृ० ६७।
रा० सू० III, पृ. १३।
भट्टारक सम्प्रदाय, पृ० १८१।
Catg. of Skt. & Pkt. Ms., P. 649.

४०१. तत्वार्थसूत्र

४०१

Opening : सम्यग्दर्शन ज्ञानचरित्राणि मोक्षमार्गः।

Closing : तत्वार्थसूत्रकर्त्तारं शुक्ल पक्षोपलक्षितम्।
वंदे गणेन्द्र संजातमुमास्वामि मुनीश्वरम्॥

Colophon : इति दसध्याय सूत्र सम्पूर्णम् लिखितं पंडित कस्तुरी चंद तारतोलमध्ये पठनार्थम् लाला सोवयाल का बेटा मनुलाल के वास्ते संवत् १६४६ का मिति आसोज सुदी पूर्णमासी के दिन समाप्तम्.......

देखें—(१) दि० जि० ग्र० र०, पृ० ८१।
(२) जि० र० को०, पृ० १५४ (२)।
(३) प्र० जै० सा०, पृ० १५१।
(४) रा. सू. II, पृ. २८, ८३।
(५) रा. सू. III. पृ. ११, १२।
(6) Catg of Skt. & Pkt. Ms., P. 7

४०२. तत्त्वार्थसूत्र

Opneing : त्रैकाल्यं द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्या ।।
पंचान्यंचास्तिकाया व्रत समिति गति ज्ञानचरित्रभेदाः ।।
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः ।।
प्रत्येतिश्रद्धाति स्पृशति च मतिमानयं सवैशुद्धदृष्टि ।।१।।

Closing : नवमे संवर निजर। दसमे मोक्ष्यं वियाणेहि।
इयतत्त तच्च भणियं। दहसूत्रे मुणिदेहि ।।७।।

Colophon : इति श्री उमास्वामि विरचित तत्त्वार्थसूत्र समाप्तं। लिखित पंडित किसनचंद सवाई जयपुर का वासी ।। धर्ममूर्ति धर्मात्मा कवरजी श्री दिलसुखजी पठनार्थं ।।

४०३. तत्त्वार्थसूत्र

Opening : .... संसारिणस्त्रसस्थावराः।
Closing : देखें—क्र० ४०१।
Colophon : इति उमास्वामीकृत तत्त्वार्थसूत्रं समाप्तम्।

४०४. तत्त्वार्थसूत्र

Opening : त्रैकाल्यं द्रव्यषट्कं ... ... शुद्धदृष्टिः ।।
Closing : तवयरणं .... निजारई ।।
Colophon : इति श्री तत्त्वार्थाधिगमे मोक्षशास्त्रे दशाध्यायसूत्र जी समाप्तम्।

४०५. तत्त्वार्थसूत्र वचनिका

Opening : देखें—क्र० ४०२।
Closing : .... आनयन, प्रेष्यप्रयोग, पुद्गलक्षेप ... ...।
Colophon : अनुपलब्ध।

४०६. तत्वार्थसूत्र

Opening : देखें---क्रम ४०४ ।

Closing : देखें---क्र० ४०४ ।

Colophon : इति सूत्रदशाध्याय समाप्तम् ।
श्रावणमासे कृष्णपक्षे तिथौ १ (एक) चन्द्रवासरे सवत् १९५५ श्री ।

४०७. तत्वार्थसूत्र

Opening : त्रैकाल्यं द्रव्यषट्कं ... ... शुद्धदृष्टिः ॥

Closing : तत्वार्थसूत्रकर्त्तारं ' " मुनीश्वरम् ॥

Colophon : इति उमास्वामीकृत तत्वार्थसूत्र समाप्तम् ।

४०८. तत्वार्थसूत्र (मूल)

Opening : त्रैकाल्यंद्रव्यषट्कं " शुद्धदृष्टि ॥

Closing : तत्वार्थसूत्र .... उमास्वामिमुनीश्वरम् ॥

Colophon : इमि तत्वार्थाधिगमे मोक्षशास्त्रे दशमोध्याय: सवत् १९०८ चैत्रकृष्णपक्षे नवम्यां बुद्धवारे ।

४०९. तत्वार्थसूत्र

Opening : त्रैकाल्य द्रव्यषट्कं ..... शुद्धदृष्टिः ॥

Closing : पहिले चतुके जीवपंचमे जाणि पुग्गलतं च ।
छहसत्तमेत्रआश्रव अष्टमे जानि बध ॥
नवमे संवरनिर्जरा, दशमे ज्ञानकेवलं मोक्ष ॥

Colophon : इति तत्वार्थसूत्रम् ।
पुरन सुतर जी ।

४१०. तत्वार्थसूत्र

Opening : मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्वानां वंदे तद्गुणलब्धये ।

Closing : भयो सिद्धकारज यह मंगल करता सोई।
इहकथा वंधराधर्मजिन परभव मिलियो मोह ॥

Colophon : अनुपलब्ध।

४११. तत्वार्थसूत्र टिप्पण

Opening : देखें—क्र० ४१०।

Closing : संवत् उगणीसैदशशुद्ध।
फाल्गुण वदि दशमी तिथि बुद्ध ॥
लिख्यो सूत्र टिप्पण गुणधान।
नमैं सदा सुख मिति धरिध्यान ॥

Colophon : इति श्री तत्वार्थ सूत्र का देशभाषामय टिप्पण समाप्तम्। संवत् १६१० मिति फाल्गुण कृष्ण १४ दीत वार समाप्तम्।

४१२. तत्त्वार्थवृत्ति

Opening : जयन्ति कुमतध्वांतपाटने पटुभास्वराः।
विद्यानंदास्सतां मान्याः पूज्यपादाः जिनेश्वराः ॥

Closing : तस्यात्सुविशुद्धदृष्टिविभवः सिद्धान्त पारंगतः,
शिष्यः श्रीजिनचंद्रनामकलितः चारित्रभूषान्वितः।
वाशिष्टैरपिनदिनामविबुधस्तस्याभवत्तत्ववित्,
तेनाकारिसुखादिबोधविषया. तत्वार्थवृत्तिः स्फुटम् ॥

Colophon : परमत महासैद्धान्तिजिनचंद्रभट्टारकस्ताच्छिष्य पंडित श्रीभास्करनंदिविरचितमहाशास्त्रतत्वार्थवृत्तौ सुखबोधायां दशमोध्यायः समाप्तः।

स्वस्ति श्री विजयाभ्युदयशालिवाहनशकाब्दाः १७५० ने सर्वधारिसंवत्सरद्कार्तिकशुद्ध १४ गुरुवारदिन तत्वार्थसूत्रक्के सुखबोधयं ब वृत्तियन्नु तगडूरु सिद्धान्तिब्रह्मसूरि ज्येष्ठपुत्रनादंता, चंद्रोपाध्यसिद्धातियुबरे दुदु संपूर्णवादुदु। जयमंगलं। शोभनमस्तु ॥

देखें—जि० र० को, पृ० १५६।

४१३. तत्वार्थबोध

Opening : सिवमग दाइकभान, कर्मतिमिर गिरके हरनं ।
सर्वतत्वमय ग्यान, वदूं जिणगुण हेतकूं ॥

Closing : संवत्ठारासै विषै, अधिक गुन्यासी देस ।
कातिकसुद सासिपंचमी, पूरनग्रंथ असेस ॥
मंगल श्री अरिहंत, सिधमंगलदायक सदा ।
मंगलमाधमहंत, मंगल जिनवर धर्मवर ॥

Colophon : इति श्री तत्वार्थबोध ग्रंथ संपूर्णम् । इति शुभ मिति आषाढ़ सुदी १२ संवत् १९८२ ।
जैसी प्रत पाई हती, तैसी दई उतार ।
भूलचूक जो होय सो, बुधजन लियौ सुधार ॥
हस्ताक्षर पं० चौबे लक्ष्मीनारायण के ।

४१४. तत्वार्थसूत्र टीका

Opening : देखें०—क्र०, ४१० ।

Closing : इह भांति करि घणांही भेदास्यौं सिद्ध हुआ सो सिद्धान्त से समझि लीज्यो ।

Colophon : इति श्री तत्वार्थाधिगमे मोक्षशास्त्रे दशमोध्याय: ।१०। श्री उमास्वामी विरचितं सूत्र बालाबोध टीका पांडे जैवंतकृत संपूर्ण: । संवत् १९०४ वैशाख शुक्ल १२ लिपि कृतं इदम् ।

४१५. तत्वार्थसूत्र वचनिका

Opening : देखें—क्र० ४१० ।

Closing : ऐसें ही कालादिक का विभागतैं अल्पबहुत्व जानना । ऐसें द्वादश अनुयोगनि करि सिद्धनि में भेद है और स्वरूप भेद नहीं है ।

Colophon : इति तत्वार्थाधिगमे मोक्षशास्त्रे दशमोध्याय: ॥१०॥
देखें—क्र० ४११ ।

इति श्री तत्वार्थसूत्र का देशभाषामय टिप्पण समाप्त । लिखतं दौलत-राम बख्रावसासनी मध्ये पुरु बकस के बेटा ने । संवत् १९२५ शुक्ल ६ गुरुवासरे सम्पूर्णं । शुभमस्तु ।

४१६. तत्वार्थसूत्र टीका

Opening : शुद्धतत्व की अर्थ में, लह्यो सार जिनराय ।
जिनपद नमों त्रियोगिकरि, इष्ट इष्ट सुखदाय ॥

Closing : आदि अन्त मंगल करत, होत काज हितकार ।
तातैं मंगलमय नमौं, पंच परम गुरु सार ॥

Colophon : इति तत्वार्थसूत्र दशाध्याय की तत्वार्थसार नामा भाषा टीका समाप्ता । संवत् १९७० शक: १८३५ चैत्र शुक्ला ५ भृगुवासरे लिपि-कृतम् पं० सीताराम शास्त्री निजक ण संशोधिता: ।

४१७. तत्वार्थाधिगम सूत्र

Opening : पूज्यपादं जगद्वंद्यं तत्वोमास्वामीभाषितम् ।
क्रियते बालबोधाय मोक्षशास्त्रस्य टिप्पणीम् ॥

Closing : रत्नप्रभाकरा सर्वार्थसिद्धिराजवार्तिका: ।
श्रुताभोधिकृतयाश्चश्लोकवार्तिकसंज्ञिका ॥
ताभ्य विशेषज्ञानाय ज्ञेया विस्तारमंजसा ।
अल्पज्ञानाय सर्वेषां रचिता बोधचंद्रिका ॥

Colophon : इति तत्वार्थ सिद्धान्त सूत्रस्य टीकासमाप्तेयम् । श्रीरस्तु । सम्वत् १६१६ मिती फाल्गुन शुक्लदशम्यां स्वहस्तेन लिपि-कृतम् इन्द्रप्रस्थे पं० शिवचन्द्रेण ।

४१८. तत्वार्थ वार्तिक

Opening : अनुपलब्ध ।

Closing : इति तत्वार्थसूत्राणां भाष्यं भाषितमुत्तमै: ।
यत्रसंनिहितस्तर्कन्यायागम विनिर्णय: ॥

Colophon : इति तत्त्वार्थवार्तिकव्याख्यानालंकारे दशमोध्याय: समाप्त: ।।
जीयाज्जगतिजिनेश्वरनिगदितधर्मप्रकाशक: सूरि:
अभयेंदुरितिख्यात: पत्त्वादिपितामह: सततम् ।।
वंदे बालेंदु मुनितममंदबुधाग्रणि गुणनिधिम्
यस्य वचस्तोऽस्त स्वांतध्वंतं दुरस्तमपि नश्येत् ।।

श्रीपंचगुरुभ्यो नम: मंगलमहा । शके २२६२ वर्तमान प धावी संवत्सरे भाद्रपदशुक्लएकादश्यां भानुवासरे समाप्तोऽयं ग्रंथ: ।। दक्षिणकर्नाटदेशे उडुपी कार्ककप्रांत्यदुर्गग्रामनिवासस्थरामकृष्ण स्त्रिण: पुत्रो रंगनाथ भट्टेन लिखितं पुस्तकम् ।।

शुभ मगलानि भवतु ।।

देखें—जि० र० को०, पृ० १५६ ।

४१९. त्रैकालिकद्रव्य

इस ग्रंथ में मात्र "त्रैकाल्य द्रव्यपट्क ... इत्यादि अर्थ सहित लिखा गया है ।
अन्त मे एक भजन भी है ।

४२०. त्रैलोक्य प्रज्ञप्ति

Opening : अट्ठविहकम्मवियला णिट्ठिय कज्जाणट्ठ समारा ।
दिट्ठसलत्थसारासिद्धासिद्धि मम दिसंतु ।।१।।

Closing : सूरि श्री जिनचंद्रां घ्रि स्मरणाधीन चेतसा ।
प्रशस्तिर्विहिता वासौमीहाख्येनसुधीमत्ता ।।१२३।।
यत्रयुक्ताप्पवधस्यादर्थे पा मयादृत्त ।
तदाशोध्यबुधैर्वाच्चमनंत: शब्दवारिधि: ।।१२४।।

Colophon : इति सूरि श्रीजिनचद्रांतेवासिना पंडित मेधाविना विरचि प्रशस्ता प्रशस्ति: समाप्ता: ।। श्री सिंहपुरी जैनतीर्थ समीप सथवा ग्र निवासी कायस्थ बटुकप्रसाद ने श्री जैन सिद्धान्त भवन, आरा लिखा ।। सं० १९८८ विक्रम ।।

४२१. त्रैलोक्य प्रज्ञप्ति

Opening : देखें—क० ४२० ।

Closing : देखें,—क० ४२० ।

Colopnon : देखें—क० ४२० ।

४२२. त्रिभङ्गी

Opening : श्री पंचगुरुभ्यो नमः ॥
पणमियसुरिन्दद पूजियपयकमलं वड्ढमाणममलगुणं ।
पच्चयसत्तावण्णं वोच्छेह सुणुहु भवियजणा ॥१॥

Closing : जह चक्केण य चक्की छक्खंडं साहये अविग्घेण ।
तहमइ चक्केण मया छक्खंडं सहियं संमं ॥

Colophon : इति श्री कनकनंदि सैद्धांतिकचक्रवर्तिकृत विस्तरसत्वत्रिभंगी समाप्ता ॥

४२३. त्रिभंगीसार टीका

Opening : सर्वज्ञं करुणार्णवं त्रिभुवनं धीमार्च्यपादं विभुम्,
यं जीवादिपदार्थसार्थकलने लब्धप्रशंसं सदा ।
तं नत्वाखिलमंगलास्पदमहं श्रीनेमिचन्द्रं जिनं,
वक्ष्ये भव्यजनप्रबोधजनकं टीकां सुबोधाभिधाम् ॥

Closing : श्री सद्यां हि युगे जिनस्य नितरां लीन: शिवासाधर:,
सोमः सद्गुणभाजनं सविनयः सत्पात्रदाने रतः ।
सद्रत्नत्रययुक् सदा बुध मनोरुहावीचिरं भूतले,
तंयावे न विवेकिना विरचिता टीका सुबोधाभिधा ॥

Colophon : इति त्रिभंगीसार टीका समाप्ता । संवत् १६१५ । विक्रमादित्यगताब्दवाणैकरद्राचंद्र वर्षे ज्येष्ठवदि तृतीयायां ३ सुरगुरुवासरे पूज्य श्री अर्यानीऋषिशिष्य. दुर्गु नाम्नेति ऋषिलिख्यतं आत्मावबोधनार्थं जलमार्गसंज्ञाभिधानेन नगरे लिख्यतमिदं पुस्तकम् ।

यहप्रतिलिपि श्रावणकृष्णा १३ गुरुवार वि० स० १९९४ को लिखी गई । हस्ताक्षर रोशनलाल लेखक ।

देखें—जि० र० को०, पृ० १६२।
दि. जि. ग्र. र., पृ. ८७।
जै. ग्र. प्र. सं. १, पृ. २८, प्रस्तावना, पृ. २६।

४२४. त्रिलोकसार

Opening : बलगोविंदसिहामणि किरणकलावरुणचरणणहकिरणं।
विमलयरमणेमिचंदं तिहुवणचदं णमसामि ॥

Closing : अरहंतासिद्धायरिय उवज्झायासाहुपंचपरमेट्ठी।
इयपंचणमोयारो भवे भवे मम सुह दिंतु ॥१०१०॥

Colophon : इति श्री त्रिलोकसारजी श्रीनेमिचद आचार्यकृत मूलगाथा संपूर्णम्। शुभ मस्तु ॥

देखें—जि० र० को०, पृ० १६२।
Catg. of Skt. & pkt Ms, P. 162.
Catg. of Skt. Ms, P. 320.

४२५. त्रिलोकसार

Opening : देखे—क० ४२४।

Closing : ... ... महाध्वजं प्रशपरिवारध्वज १०८।
महाध्वज ह १०८० । ल दि १ ... ११६६२०।

४२६. त्रिलोकसार भाषा

Opening : ... ... समान ही सिन्धु नदी है. सो सर्व वर्णन सिंधु विषै भी तैसे ही जानना।

Closing : तातै परमवीतराग भावरूप शुद्धात्म स्वरूप जनित परम आनंद की प्राप्ति करहु।

Colophon : इति श्री त्रिलोकसार जी श्री नेमिचंद्र आचार्यकृत मूलगाथा ताकी टीका संस्कृत कर्त्ता आचार्यमाधवचंद्र ताकी भाषा टीका टोडरमल जी कृत संपूर्ण।

४२७. त्रिलोकसार

Opening : त्रिभुवनसार अपारगुन, ज्ञायक नायक संत ।
त्रिभुवन हितकारी नमौं, श्री अरहंत महंत ॥

Closing : अर्थकों जानता संता रागादिक त्यागि मोक्षपद कों पावै है । अब संस्कृत टीका अनुसार लिए मूलशास्त्र का अर्थ लिखिए है ।

Colophon : इति श्री त्रिलोकसार का टीका का पीठबंध सम्पूर्णम् ।
विशेष—अन्त में पीठबंध सम्पूर्ण ऐसा लिखा है, लेकिन ग्रंथ की भाषा टीका लिखी जा चुकी है।

४२८. त्रिलोकसार

Opening : मंगलमय मंगलकरन वीतराग विज्ञान ।
नमों ताहि जाते भये अरिहंतादि महान ॥

Closing : इति श्री अरिष्ट नेम पुराण ···· ··· ।

Colophon : अनुपलब्ध ।

४२९. त्रिलोकसार भाषा

Opening : देखें—क्र० ४२७ ।

Closing : अब संस्कृत टीका अनुसार लिए मूलशास्त्र का अर्थ लिखिए हैं ।

Colophon ; इति श्री त्रिलोकसारभाषाटीका का पीठबंध सम्पूर्ण । संवत् १८६६ वर्षे मिती सावन बदी दो लिखतं भूपतिराम तिवारी, लिखी मोहौकमगंज मध्ये ।

४३०. त्रिवर्णाचार (५ पर्व)

Opening : अथोच्यते त्रिवर्णानां शौचाचारविधिक्रम: ।
शौचाचारविधिप्राप्तौ देहं संस्कर्तुमर्हसि ॥१॥
संस्कृतो देह एवासौ दीक्षणाद्यभिसम्मत: ।
विशिष्ठान्वयजोऽप्यस्मै नेष्यतेऽयमसंस्कृत: ॥२॥

Closing : तत्रोपनयनादारभ्य समावर्तनपर्यन्तमुपनयनब्रह्मचारी । स्त्री-सेवां कुर्वाणो जुगुप्सया गुरुसमक्षं तन्निवृत्त: आलम्बनब्रह्मचारी । विवाहपूर्वकं त्रिभुवनपरिग्रहारम्भाद् क्रियाप्रवृत्तो गृहस्थ: । परिग्रहानु-

मत्युद्दिष्टनिवृत्ता वाणप्रस्थाः । वैराग्यश्रीश्रितो महाव्रती भिक्षुः । इत्याश्रमलक्षणम् ।

Colophon : इति ब्रह्मसूरि विरचिते जिनसंहितासारोद्धारे प्रतिष्ठातिलकनाम्नि त्रैवर्णिकाचारग्रंथे (संग्रहे) गर्भाधानादिविवाह-पर्यन्तकर्मणां मन्त्रप्रयोगो नाम पञ्चमं पर्व समाप्तम् । फाल्गुनशुद्ध द्वितीयाया तिथौ समाप्तः ॥

देखें– जि० र० को०, पृ० १६३ ।

४३१. त्रिवर्णाचार (५ पर्व)

Opening : देखें, क० ४३० ।

Closing : देखें, क० ४३० ।

Colophon : इति श्री ब्रह्मसूरिविरचिते जिनसंहितासारोद्धारे प्रतिष्ठातिलकनाम्नि त्रैवर्णिकाचारसंग्रहे गर्भाधानादि विवाहपर्यन्तकर्म्मणां मंत्र-प्रयोगो नाम पंचमं पर्व्व । नमः सिद्धेभ्यः । श्री चंद्रप्रभजिनाय नम ॥

४३२. त्रिवर्णाचार (१३ अध्याय)

Opening : श्री चंद्रप्रभदेवदेवचरणौ नत्वा सदा पावनौ,
संसारार्णवतारकौ शिवकरौ धर्मार्थकामप्रदौ ।
वर्णाचार विकाशकं वसुकरं वक्ष्ये सुशास्त्रं परम्,
यच्छ्रुत्वा सुचरंति भव्यमनुजाः स्वर्गादिसौख्यार्थिनः ॥

Closing : श्लोकानां यत्र संख्यास्ति शतानिसप्तत्रिंशतिः ।
तद्धर्मरसिकं शास्त्रं वक्तुः श्रोतुः सुखप्रदम् ॥

Colophon : इति श्री धर्मास्तिकशास्त्रे त्रिवर्णाचारप्ररूपणे भट्टारक श्रीसोमसेनविरचिते सूतकशुद्धिकथनीयो नाम त्रयोदशमोऽध्यायः ॥ इति त्रिवर्णाचारः समाप्तः ॥ संवत् १७५६ वर्षे फाल्गुन सित पक्षे त्रयोदशी गुरुवासरे इयं संपूर्णा जाता । अहमदाबादमध्ये इदं पुस्तकं लिखितमस्ति । शुभं भूयात् । श्री मूलसंघे बलात्कारगणे सरस्वती ग .... कुन्दकुन्दान्वये श्रीभट्टारक विश्वभूषण जी देवास्तत्पट्टे श्रीभट्टारक जिनेन्द्रभूषणजी देवास्तत्पट्टे श्रीभट्टारक महेन्द्रभूषण जी देवा तेनेदं देवेन्द्रकीर्तेः दत्तम् ।

देखें—दि० जि० ग्र० र०, पृ० ८८ ।
जि०र० को०, पृ० १६३, I ।

प्र० जै० सा०, पृ० २५६ ।
रा० सू० II, पृ० ७, १५५ ।
रा० सू० III, पृ० १८४ ।
जै० प्र० प्र० सं० १ प्रस्तावना पृ. २६ ।
Catg. of skt. & pkt. Ms., P. 651.

४३३. त्रिवर्णाचार

Opening : तज्जयति परं ज्योतिः समं समस्तैरनंतपर्यायैः ।
दर्पणतल इव सकला प्रतिफलति पदार्थमालिका यत्र ॥
(पद्य पुरुषार्थ सिद्ध्युपाय का है ।)

Closing : धर्मार्थकामाय कृतं सुशास्त्रं, श्री जैनसेनेन शिवार्थिनापि ।
गृहस्थधर्मेषु सदारता ये कुर्वन्तु तेऽभ्यासमहोजनास्ते ॥

Colophon : इत्यार्षे श्रीमद्भगवन्मुखारविन्दविनिर्गते श्री गौतमर्षि पादपद्मा-राधकेन श्री जिनसेनाचार्येण विरचिते त्रिवर्णाचारे उपासकाध्ययनसारोद्धारे सूतकशुद्धि कथनीय नाम अष्टादश पर्व. ॥१८॥ इति त्रिवर्णाचार समाप्तम् । संवत् १९७० । मिती पौष वदी ५ बुधवासरे लिखितमिदं पुस्तकं गुलजारीलाल शर्म्मणा । भिण्डाग्रनगरवासोस्ति । रिम्वालियर ।
देखें—जि० र० को०, पृ० १६३ ।
Catg. of skt. & Pkt. Ms., p. 651.

४३४. त्रिवर्णाचार

Opening : देखें—क्र० ४३३ ।
Closing : देखें—क्र० ४३३ ।
Colophon : देखें—क्र० ४३३ ।
मिति श्रावण कृष्ण ११ संवत् १९१९ । शुभं भूयात् ।]

४३५. त्रिवर्णाचार

Opening : देखें—क्र० ४३३ ।
Closing : देखें—क्र० ४३३ ।
Colophon : इत्यार्षे श्रीमद्भगवन्मुखारविन्दाद्विनिर्गते श्री गौतमर्षि-पदा

पद्मारापकेन श्री जिनसेनाचार्येण विरचिते त्रिवर्णाचारे उपासकाध्ययन-सारोद्धारे सूतकशुद्धि कथनीय नाम अष्टादश पर्व ॥१८॥ संवत् १९१९ .... वार मंगलवारे लि. कोठारी मोहनलाल मुंगरमी ॥ रहेवाशी बबवाण शे हेरना ॥ श्लोक सख्या ८५२५ ॥

४३६. त्रिवर्णाचार वचनिका

Opening : देखें —क्र० ४३२ ।

Closing : जयबंतो यह शास्त्र शुभ भूमंडल में नित्त ।
मंगलकर्ता हूजियो सुखकर्त्ता भविचित्त ॥

Colophon : इति त्रिवर्णाचार ग्रन्थ की वचनिका समाप्तम् । ज्येष्ठ शुक्ला १५ शनिवासरे सवत् १९५९ ।

४३७. त्रिवर्णा शौचाचार (७ परिच्छेद)

Opening : देखें - क्र. ४३० ।

Closing : आर्षं यद्यच्च तेषामुदितखनयानूतनापुण्यभाज: ।
मेतत्त्रैवर्णिकाद्याचरणविधिमहाकण्ठिका कण्ठमेति ॥

Colophon : इत्यार्षसंग्रहे त्रैवर्णिकाचारे नित्यनैमित्तिकक्रमो नाम सप्तम परिच्छेदः ॥ श्रीमदादिनाथाय नमः ॥ श्रीमद्विद्यागुरु श्री मदन·तमुनये नमः ॥पुस्तकमिदं श्री वेणुपुरस्थगीर्वाणपाठशालाध्यापकनेमिराजय्या-ज्ञानुसारेण संक्रमणात्मजेन पद्मराजनाम्ना मया प्रणीतमस्ति मंगलमस्तु चिरं भूयात् । करकृतमपराधं क्षन्तुमर्हन्ति सन्त: इति विरम्यते ।

श्रीरस्तु ।

४३८. उपदेश रत्नमाला

Opening : तिहुवण परमेसरेहइवमीसरे अनंतचतुष्टय सहियो ।
बंदमि श्रुतसारणे कबुपसारणे सुरनरेन्द्र अहिमहियो ॥

Closing : मो अवियाणिधरी अणलगत्त अथहुछंद हीणय ।
संवारहु सुबुधिपंडित जनतुमसी जमि पमाणयं ॥

Colophon : इति श्री महापुराणसम्बन्धिनिकलिका समाप्ता । शुभमिति फाल्गुन शुक्ला २ बृहस्पतिवार वीर सं० २४६० वि० सं. १९९० ।

४३९. उपदेश रत्नमाला (१८ परिच्छेद)

Opening :

वंदे श्री वृषभं देवं, दिव्यलक्षणलक्षितम् ।
प्रीणितं प्राणिसद्वर्गं, युगादिपुरुषोत्तमम् ॥१॥
अजितं जितकर्मारिं, संतारं शीलसागरम् ।
भवभूधरभेत्तारं, शंभवं च भवे सदा ॥२॥

Closing :

सहस्त्रत्रितयं वंदो परि असीत संयुतम् ।
अनुष्टप् वंद सा चास्य, प्रमाणं निश्चितं बुधैः ॥

Colophon :

इति भट्टारक श्री शुभचंद्र शिष्याचार्य श्री सकलभूषण विरचितायामुपदेशरत्नमालायां पुण्यषट्कर्मप्रकाशिकायां तपोदानमाहात्म्यवर्णनो नामाष्टदशः परिच्छेदः ।१८। समाप्तः । श्री साहिजहनाबादे पृथ्वीपति मुहम्मद साह शुभराज्ये संवत् वेदनभगजशशि वैशाख शुक्ल सप्तम्यां ।

सकलगुणधारिणो भव्यजीवतारणो,
परोपकारिणो गुरुगुण अनुचारिणो ॥
श्री भट्टारकपदधार देवेन्द्रकीर्ति विस्तारं
तत्पट्टे सुखकारं श्री जगकीर्तिबहुश्रुतं धारम् ॥
एषा प्रति प्रमुदितया लिखापिता शिष्यपरंपराचार्ये
मेरु शशि भानु यावत् तावदियं विस्तरतां यान्तु ॥ (१११४)

देखें—दि. जि. ग्र. र., पृ. ८६ ।
जि. र. को., पृ. ५१ (VI) ।
रा. सू. II, पृ. १४६ ।
रा. सू. III, पृ. २३ ।
आ० सू० पृ० १६ ।
जै० ग्र० प्र० सं० १, पृ० १६ ।
प्र० सं० (कस्तूरचन्द), पृ० २–४
भट्टारक सम्प्रदाय, पृ. २४ ।
Catg. of Skt. & Pkt. Ms., P. 628.
Catg. of Skt Ms., P. 312.

४४०. उपदेश रत्नमाला

Opening : देखें—क्र० ४३९ ।

Closing : देखें—क्र० ४३६ ।

Colophon : इति श्री भट्टारक श्री शुभचन्द्र शिष्याचार्य्य श्री सकलभूषण विरचितायमुपदेशरत्नमालायां पुण्यषटकर्म्मप्रकाशिकायां तपोदान माहात्म्यवर्णनोनामष्टादशः परिच्छेदः ।।१८।। मितीफागुनसुदी ।।३।। भृगुवासरे ।। सम्वत् ।।१६७०।। लिखितमिदं पुस्तकं मिश्रोपनामक गुलजारीलालशर्म्मणा मिर्जापुरनगरवासोस्ति ।। इस ग्रन्थ की श्लोक संख्या ।।३६००।। प्रमाणम् ।।

४४१. वैराग्यसार सटीक

Opening : इक्कहिं घरेवधामणा अण्णहिं घरि धाहहि रोविज्जइ ।
परमत्थई सुप्पउ भणई किमवइ सयभाउण किज्जइ ।।

Closing : ..... असौ जीवः चतुर्गतिषु अनंतदुःखानि भुंजति । कदाचित् सुख न प्राप्नोति ।

Colophon : इति सुप्रभाचार्यकृत वैराग्यसार प्राकृत दोहाबंध सटीक संपूर्ण: । संवत् १८२७ वर्षे मिति पौष वदि ३ बुधवारे बसवानगरमध्ये श्री चन्द्रप्रभचैत्यालये पंडित जी श्री परसराम जी तत्शिष्य पं० अणंतराम जी तत्शिष्य श्रीचंद्र स्ववाचनार्थं वा उपदेशार्थं लिपिकृतं । लेखकपाठकयो: शुभमस्तु । श्रीजिनराजसहाय । तत्लिपे. संवत् १६८६ विक्रमीये मासोत्तमेमासे कार्तिकमासे शुक्लपक्षे चतुर्दश्यां गुरुवासरे आरानगरे स्व० देवकुमारेण स्थापित श्री जैनसिद्धान्तभवने श्री के० भुजबलीशास्त्रिण: अध्यक्षतायां इदं प्रतिलिपि पूर्तिमभवत् । इति शुभं भूयात् ।

देखें—जि० र० को, पृ० ३६६ ।

४४२. वसुनन्दि श्रावकाचार वचनिका

Opening : वंदूं मैं अरिहंतपद, नमूं सिद्ध शिवराय ।
सूरि सु पाठक साधुके, चरण नमूं सुखदाय ।।१।।
वंदूं श्री जिनवैन कूं, वंदूं श्री जिनधर्म ।
जिमप्रतिमा जिनभवन कूं नमूं हरण वसुकर्म ।।२।।

Closing : ऋषि पूरण नव एक फुनि, माघव फुनि सुभ स्वेत ।
जया प्रथम कुजवार मम, मंगल होऊ निकेत ।।

Colophon : इति श्री वसुनन्दि सिद्धान्ती, चक्रवर्ति विरचित श्रावकाचार की वचनिका संपूर्णम् ।

वेदषणन्द चन्द्रेब्दे वैशाखे पूर्तिगें सिते ।
सीतारामाभिधेयेन लिखितं शोधितं मया ॥

भग्न पृष्टिकटिग्रीवा ऊर्ध्वदृष्टि अधोमुखम् ।
कष्टेन लिखितं शास्त्रं यत्नेन परिकल्पयेत् ॥

४४३. वसुनन्दि श्रावकाचार

Opening : देखें—क्र० ४४२ ।

Closing : देखें—क्र० ४४२ ।

Colophon : इति श्री वसुनन्दि सिद्धान्त चक्रवर्ती विरचित श्रावकाचार की वचनिका सम्पूर्णम् । संवत् १६०७ वैशाख शुक्ल ३ भौमवासरे । पुस्तक लिखी ब्राह्मण श्री गोपमालजी ज्ञाति साम्प्रदाय पड़ा भैरव लाले सू ।

४४४. वसूनन्दि श्रावकाचार वचनिका

Opening : देखें—क्र० ४४२ ।

Closing : अपठनीय (जीर्ण) ।

Colohpon : अपठनीय (जीर्ण) ।

४४५. विदग्धमुखमण्डन (४ परिच्छेद)

Opening :

सिद्धौषधानि भवदुःख महागदानां,
पुण्यात्मनां परम कर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां,
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥

Closing :

पूर्णचन्द्रमुखीरम्या कामिनी निर्मलांबरा ।
करोति कस्य न स्वांतमेकान्तमदनोत्तरम् ॥

Colophon : च्युतदत्ताक्षरजातिः । इति धर्मदासविरचिते चतुर्थपरिच्छेदः समाप्तं शास्त्ररत्नमिदं विदग्धमुखमंडनाख्यम् ।

... ...

४८० ग्रंथश्लोका: ।

देखें—जि० र० को., पृ. ३५५ ।

दि. जि. ग्र. र., पृ.

Catg. of Skt. & Pkt. Ms, P. 691

४४६. विश्वतत्वप्रकाश (१ अध्याय)

Opening : विश्वतत्वं प्रकाशाय परमानंदमूर्तये ।
अनाद्यनंतरूपाय नमस्तस्मै: परमात्मने ।।

Closing : चार्वाकवेदांतिकयोगभाट्टप्राभाकरार्षक्षणिकोक्ततत्वम् ।
यथोक्तयुक्त्याविततं समर्थ्यं समापितोऽय प्रथमोधिकार ।।

Colophon : इति परवादिगिरिसुरेश्वर श्री भावसेनत्रैविद्यदेवविरचिते मोक्षशास्त्रे विश्वतत्वप्रकाशे अशेषपरमततत्वविचारे प्रथम. परिच्छेद समाप्त: । शुभसवत् १९८८ फाल्गुण शुक्ला १० गुरुवासरे ।

विशेष—प्रथम परिच्छेद के अतिरिक्त एक पत्र में प्रमाण के विषमर थोड़ा सा लिखा है, जिसमे विभिन्न मतो मे स्वीकृत प्रमाण सख्या दी गई है । जिनरत्नकोष मे भी पृष्ठ ३६० पर इसका एकही अधिकार होने की सूचना है ।

देखें दि० जि० ग्र० र०, पृ० ३६० ।

Catg. of Skt & Pkt. Ms., P. 692.

४४७. विवाद मत खण्डन

Opening : किं जापहोमनियमैः तीर्थस्नानैश्च भारत ।
यदि स्वादति मांसानि सर्वमेव निर्थकम् ।।

Closing : मद्वयं मद्वयं चैव च त्रियं व चतुष्टय ।
अनया कुस्कलितानि पुराणानष्टादशानि च ।।

Colophon : इति विवादमत खंडन सम्पूर्णम् ।

४४८. विवादमत खन्डन

Opening : अहिंसासत्यमस्तेयं त्यागो मैथुनवर्जनम् ।
यं च स्वे तेषु धर्मेषु सर्वधर्माः प्रतिष्ठिताः ॥

Closing : अष्टादशपुराणानां व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

Colophon : इति भारते इति तांबूलाख्यानकाधिकारः एकविंशतितमः २१ इति संपूर्णम् ।

४४९. विवेक विलास

Opening : शाश्वतानंदरूपाय तमः स्तोमैक भास्वते ।
सर्वज्ञाय नमस्तस्मै कस्मैचित्परमात्मने ॥

Closing : सश्रेष्ठः पुरुषाग्रणी स सुभटोत्तं सः प्रसंसास्पदं स,
प्राज्ञः सकलानिधि स च मुनि सक्ष्मातले योगविश ।
सज्ञानी सगुणि व्रजस्यतिलको जानातियःस्वांभूतिं,
निर्मोहः समुपार्जयत्यथा पदं लोकोत्तरं सास्वतम् ॥

Colophon : इति श्री जिनदत्त (सू) रि विरचिते द्वादसोल्लासे विवेक विलासे जन्मचर्यायां परमपदप्रापणोनाम द्वादसमोल्लासः ।

यह ग्रंथ करीब विक्रम सं० १६०० से कम का है ।

देखें—जि० र० को, पृ० ३५६ ।

Catg. of Skt. & Pkt. Ms., P. 692.

४५०. वृहद्दीक्षाविधि

Opening : पूर्वदिने भोजनसमये भोजनतिरष्कारविधि विधाय... ...

Colsing : स्वान्येषां ज्ञानसिद्धयर्थं शास्त्राण्यालोच्य युक्तितः
गुरुमार्गानुयायीति प्रतिष्ठासारसंग्रहम् ॥

Colophon : लिलेखेमं फतेलालपंडितो हितकाम्यया ।
संशोधयंतु विद्वांसः सद्धर्मस्मिग्धमानसा ॥३॥

४५१. योगसार

Opening ।
भद्रं भूरिभवाम्भोधि शोषिणी दोषमोषिणी ।
जिनेशशासनायालम् कुशासनविशासिने ।।१।।

Closing ।
श्रीनन्दनन्दिवत्स: श्रीनन्दीगुरुपादाब्जषट्चरण: ।
श्रीगुरुदासो नन्धान्मुग्दमति श्री सरस्वति सूनु: ।।

Colophon । इति श्री योगसारमग्रहं समाप्तम् । संवत् १९८९ विक्रमीये मासोत्तमेमासे कार्तिकमासे शुक्लपक्षे नवमीतिथौ रविवासरे जैनसिद्धान्त भवने ··· इदं पुस्तके पूर्णमगमत् ।

देखें—जि० र० को०, पृ० ३२४ (१) ।

४५२. योगसार

Opening । देखें--क्र० ४५१ ।
तस्याभवच्छ्रुतनिधिर्जिनचंद्रनामा
शिष्योनुतस्यकृति भास्करनं(द)नाम्ना ।।
शिल्वेण संस्तवमिमं निजभावनार्थं
ध्यानानुगं विरचितं सुवितो विदंतु ।।

Colophon । इतिध्यानस्तव: समाप्त: ।

विशेष—अर्वाचीन लेख—

यह ग्रन्थ करीब १६५० विक्रम सं० का ज्ञात होता है ।

४५३. योगसार सटीका

Opening ।
णिम्मलझांण परट्ठिया कम्मकलंक डहेवि ।
अप्पा लद्धउ जेण परू ते परमप्पणवेवि ।।

Closing :
ससारह भयभीयएण जोगचंद मुणिएण ।
अप्पा संबोहणकया दोहा इक्कमणेण ।।
इति श्री जोगसारग्रंथ समाप्त: ।

जैनसिद्धान्त भवन आरा में लिखा । हस्ताक्षर रोशनलाल जैन । शुभमिति कार्तिक शुक्ला १२ शनिवार श्री वीर सम्वत् २४६२ श्री विक्रम संवत् १९९२ । इति संपूर्णम् ।

विशेष—ढूढारी हिन्दी में ग्रन्थ की टीका भी गाथाओ के साथ दी गई ।
देखें—जि. र. को., पृ. ३२४ (II) ।
Catg of Skt. & Pkt. Ms., P. 685.

४५४. आप्तमीमांसा

Opening : देवागमनभोयान् चामरादिविभूतय: ।।
मायाविष्वपि दृश्यंते नातस्त्वम सिनो महान् ।।१।।

Closing : जयति जयति केशावेष प्रपंचहिमांशुमान ।।
विहित विषमैकांतध्यात प्रमाणनया शुमान ।।
यतिपति रजोयस्याधृष्यन्मता वुनिश्चेतवान ।।
स्वमत मतयस्तीर्ध्या नानापरे समुपासते ।।११५।।
देखे—Catg. of Skt. & Pkt. Ms., P. 625.

४५५. आप्तमीमांसा

Opening : नहीं है ।

Closing : येनादोष····भीरूवृतिसरित: प्रैक्तावता शोषिता
यद्व्याच्येप्यकलंक नीतिरुचिरा तत्त्वार्थसार्थधु त: ।।
स श्री स्वामिसमन्तभद्रयतिभूद्र्याद्विधुर्भानुमान् ।
विद्यानंदफलप्रदोनघधियां स्याद्वादमार्गाग्रिणी ।।

Colophon : इत्याप्तमीमांसालंकृतौ दशम: परिच्छेद: ।
श्रीमदकलंकशशधरकुलविद्यानंद संभवा भूयात्
गुरुमीमासालंकृतिरष्टसहश्री सतामृध्य ।।
वीरसेनाख्य मोक्षगेचारुगुणानर्घ्यरत्नसिंधुगि सततम् ।।
सारतारात्ममृरानिगेमारसवांभोदपवनगिरि गह्लरियलु ।। ।।
कपटसहश्री सिद्धा सापद सहश्रीव मच मे पुण्यात्
शश्वदभीष्ट सहश्री कुमारसेनोक्तवर्द्धमानार्या: ।।१।।
स्वस्ति श्री मूलामलसंघमंडलमणि श्री कुंदकुंदान्वये
गीर्वाक्ष्येच्चवलात्वकारकगणे श्री नंदिसंघाग्रणी
स्याद्वादेतरवादिवंशिकवणोप्यपि पंचानना
मोभूत्सोस्तु शुमेयसानिह युधे श्री पद्मनंदी गणी ।।

श्रीपद्मनंद्यभिपपट्टपयोजटंसश्चैवातपचित्तयश:
स्फुरदात्मवंश: ।
राजाधिराजकृतपादपयोजसेव: स्याम्न: श्रिये कुवलये
शुभचंद्रदेव. ॥२॥
आर्यश्रीदार्यवर्यैर्यादीक्षिता पद्मनंदिभि: ।
रत्नश्रीरितिविख्याता तन्नाम्नैवास्तिदीक्षिता ॥
शुभचंद्रार्यवर्यैर्या श्रीमद्भि: शीलशालिनी
मलयश्रीरितिख्याता क्षांतिका गर्वगालि ॥
तयैषा लेखिता स्वस्य ज्ञानावरजशातये
लिखिता राजराजेन जीयादष्टसहस्रिका ॥
संवत् १८४२ कर्तिक शुक्लसप्तम्यां गुरुवारे इदं पुस्तका लिपिकृता महात्मा सीतारामेण जयनगरमध्ये । लेखकपाठक चिर-जीयात् शुभं भवतु कल्याणमस्तु ॥

४५६. आप्तमीमांसा

Opening : श्रीवर्द्धमानमभिवंद्य समन्तभद्रंमुद्भूतबोधमहिमा-
नमनिन्द्यवाचम् ।
शास्त्रावतार रचितस्तुतिगोचराप्त मीमांसितं कृतिरलं
क्रियते मयास्य ॥

Closing : अनुपलब्ध ।

देखें—(१) दि० जि० ग्र० र०, पृ० ६१ ।
(२) जि० र० को०, पृ० १७६ (VI) ।
(३) प्र० जै० सा०, पृ० १०४ ।
(४) रा० सू० II, पृ० १६६ ।
(५) रा० सू० III, पृ० ४७ २४० ।

४५७. आप्तमीमांसा भाष्य

Opening : उद्दीपीकृतधर्मतीर्थमचल ज्योतिर्ज्वलत्केवलालोकालोकित-
लोकलोकमखिलैरिन्द्रादिभि: वंदितम् ।
वंदित्वापरमार्हतां समुदयं गां सप्तभङ्गीविधिं,
स्याद्वादामृतगर्भिणीं प्रतिहति कांताधकमरावयम् ॥

Closing : श्रीवर्द्धमानमकलकमनिंद्यवंद्यं पादारविन्दयुगलं प्रणिपत्य-
मूर्द्धना ॥
भव्येकलोकनयनं परिपालयंतं स्याद्वादवर्त्मपरिणौमि
समन्तभद्रम् ॥

Colophon : इत्याप्तमीमांसाभाष्यदशमः परिच्छेदः । इति श्री भट्टकलं-
कदेवविरचिताप्तमीमांसावृत्तिरष्टशतीयं परिसमाप्ता । संवत् १६६५
वर्षे कार्तिकवदि ८ शुक्रे श्री मूलसंघे सरस्वतीगच्छे बलात्कारगणे श्री-
कुंदकुंदाचार्यान्वये भट्टारक श्री विजयकीर्तिदेवाः तत्पट्टे भट्टारक
श्री विजयकीर्तिदेवाः तत्पट्टे भट्टारक श्रीशुभचन्द्रदेवास्तच्छिष्येण ब्र०
सधारणाख्येन स्वहस्तेन लिखितमिदं शास्त्रम् । शुभं भवतु ।

देखें—(१) दि० जि० ग्र० र०, पृ० ६३ ।
(२) जि० र० को०, पृ० १६, १७८ ।
(३) प्र० जै० सा०, पृ ६७ ।
(4) Catg. of Skt. Ms. P. 306.

४५८. देवागम स्तोत्र

Opening : देवागमनभोयान् ...... नो महान् ।

Closing : जयति जगति क्लेशा ..... समुपासते ॥

Colophon : इति श्री समन्तभद्रपरमर्हता विरचिते देवागमापरनाम अष्ट-
मीमांसा स्त्रोत्रम् ।

४५९. देवागम स्तोत्र

Opening : देवागमनभोयान .... नो महान ॥

Closing : जयति जगति .... समुपासते ॥

Colophon : इति श्रीसमन्तभद्रपरमर्हताचार्य विरचितं देवागमस्तोत्रं
सम्पूर्णम् ।

४६०. देवागम वचनिका

Opening : वृषभ आदि चउवीसजिन, वंदौ शीश नवाय ।
विघनहरन मंगलकरन मनवांछित फलदाय ॥

Closing : सुखी होऊ पाठक सदा, श्रवणकरै चितधारि।
बुद्धि विग्धि मंगल कहा, होउ सदा बिस्तारि ॥

Colophon : इति श्री देवागमस्तोत्र वचनिका सम्पूर्णम्। शुभ संवत् १८६८ मासोत्तमे मासे अधिक आश्विनमासे शुक्लपक्षे द्वादश्यां चन्द्रवासरे पुस्तकमिदं संपूर्णम्। लेखाकाक्षर रघुनाथशर्मा पट्टनपुरमध्ये आलमगंज निवसति। शुभमस्तु।

४६१. देवागम वचनिका

Opening : देखें—क्र० ४६०।

Closing : अष्टादश सत साठि षट् विक्रम संवत् जानि।
चैत्र कृष्ण चतुर्थी दिवस, पूर्ण वचनिका मानि ॥

Colophon : इति श्री देवागम स्तोत्र की वचनिका सम्पूर्ण।

४६२. आप्त परीक्षा

Opening : प्रबुद्धाशेषतत्त्वार्थ बोधदीधिदीधितमालिने ॥
नमः श्रीजिनचन्द्राय मोहध्वांतप्रभेदिने ॥१॥

Closing : स जयतु विद्यानंदो रत्नत्रयभूरिभूषणस्सततम्।
तत्त्वार्थार्णवतरणे सदुपायः प्रकटितो येन ॥ ॥

Colophon : इति श्री आप्त परीक्षा विद्यानंदिस्वाचार्य ॥
समाप्तम्। संपूर्णः। शुभम् ॥

देखें—(१) दि० जि० ग्र० र०, पृ. ६१।
(२) जि० र० को०, पृ० ३०।
(३) प्र० जै० सा०, पृ० १०३।
(४) रा० सू० II, पृ. १६३।
(५) रा० सू० III, पृ० १६६।
(6) **Catg. of Skt. & pkt. Ms, P. 625.**

४६३. आप्त परीक्षा

Opening : प्रबुद्धाशेषतत्वार्थ बोधदीधितिमालिने ॥
नमः श्री जिनचंद्राय मोहध्वांतप्रभेदिने ॥

Closing : स जयतु विद्यानंदो रत्नत्रयभूरिभूषणस्सततम् ।
तत्त्वार्थार्णवतरणे सदुपायः प्रकटितो येन ॥१२६॥

Colophon : इति आप्त परीक्षा टीका विद्यानन्दि आचार्यकृतसमाप्तम् ॥
श्री गुरुभ्यो नमो नम ॥

नेत्रषट्खेटचंद्रेब्दे माधवस्यासितेशरे ॥
तिथौमृगांकवारेऽयं मूलर्क्षंपूर्तिमाप्नुयात् ॥ ॥
शिवयोगे शिवं भद्रं शास्त्र शिवप्रकाशकम्
सीतारामेण लिपितं भव्याः पाठयितुं क्षमाः ॥
रामे राज्ये बहामीये पौराज्ये जनवार्द्धिके
षड्दर्शनानि प्राप्तानि गुं मरेदानमानतः ॥३॥
इच्छावड्डिभगुंणिता इच्छार्धा चतुर्गुणेण इत्थम् ।
पुनरपि तदष्टगुणितं तीर्थंकरकदंबकं वन्दे ॥४॥

संवत् १९६२ शकःपट १८२७ वैशाख कृष्ण पंचम्याम् चंद्रवासरे लिपि-कृतम् पं० सीतारामशास्त्री शुभं सहारनपुरनगरे। भव्यजनानां सर्वेषां पठनार्थम्। मंगलं भवतु। शुभं ॥२॥

४६४. न्यायदीपिका

Opening : श्री वर्द्धमानमर्हतं नत्वा बालप्रवृद्धये ॥
विरच्यते मितस्पष्ट संदर्भन्याय दीपिका ॥१॥

Closing : ततो नयप्रमाणाभ्यां वस्तुसिद्धिरितिसिद्धः सिद्धान्तः पर्याप्त-आगमप्रमाणम् ॥

Colophon : इति श्रीमद्वर्द्धमानभट्टारकाचार्य गुरुकारुण्यसिद्धसारस्वतोदय श्रीमदभिनवधर्मभूषणाचार्यविरचितायां न्यायदीपिकायामागमप्रकाशः समाप्तः। संवत् १९१० मिति माघमासे शुक्ल पक्षे प्रतिपद्दिवसे रविवारे। शुभं भवतु ॥

देखें—दि० जि० ग्र० र०, पृ० ९५।
जि० र० को०, पृ० २१९ II
प्र० जै० सा०, पृ० १६४।
आ० सू० II, पृ० ८२।
रा० सू० II, पृ० १९७।

रा० सू० III, पृ० ४७, १६६ ।
Catg. of Skt. & Pkt. Ms, P. 662.

४६५. न्यायदीपिका

Opening : श्री वर्द्धमानमर्हन्तं नत्वा बालप्रबुद्धये ।
विरच्येतु मितस्पष्टसंदर्भ न्यायदीपिका ॥

Closing : .... तत्समाप्तौ च समाप्ता न्यायदीपिका मद्गुरोः वर्द्धमानेशोर्द्धमानदयानिधेः श्रीपादस्नेह-सम्बधात् सिद्धेय न्यायदीपिका ।

Colophon : इति श्री मद्वर्द्धमानभट्टारकाचार्य गुरुकारुण्यसिद्धिसिद्धसारस्वतोदय श्री मदभिनवधर्मभूषणाचार्य विरचितायां न्यायदीपिकायामागमप्रकाशः समाप्तः ।

४६६. न्यायमणिदीपिक

४६६

Opening : श्रीवर्द्धमानमकलङ्कमनन्तवीर्य-
माणिक्यनन्दियतिभाषितशास्त्रवृत्तिम् ।
भक्त्या प्रभेन्दुरचितालघुवृत्तिदृस्टया,
नत्वा यथाविधि वृणोमि लघुप्रपचम् ॥१॥
मदज्ञानमरुश्रीतं मलमत्र यदि स्थितम् ।
तच्छिप्काश्योमिवत्मन्तः प्रवर्त्तन्तामिहाब्धिवत् ॥२॥

Closing : अकलङ्करत्ननन्दिप्रभेन्दुमददन्तगुणिभक्त्या ।
एतद्रिको ग्रन्थो निरुद्धवारि ने(?)च किल गुरु भक्त्या ॥
स्याद्वादनीनिकान्तामुखलोकनमुख्यसौख्यमिच्छन्तः ।
न्यायमणिदीपिकां हृद्वासागारे प्रवर्त्तयन्तु बुधाः ॥

Colophon : इति परीक्षामुखलघुवृत्तेः प्रमेयरत्नमाला नामधेयप्रसिद्धाया न्यायमणिदीपिकासंज्ञायां टीकायां षष्ठः परिच्छेदः ।

श्रीमत्स्वर्गीयबाबूदेवकुमारस्यात्मजदानवीरबाबूनिर्मलकुमारस्यादेशमादाय आगराप्रान्तगतसकरौलीनिवासिनः रेवतीलालस्यात्मजराजकुमरविद्यार्थिना लिखितमिदं शास्त्रम् ।

इदं लक्ष्मणनट्टेन विलिखितं प्रथमं शास्त्रं लक्षीकृत्य लिखितम् । संशोधयितव्या विद्वज्जनैः । प्रतिलिपिकाल सं० १९८० श्रावण-शुक्ल- त्रयोदशी ।

४६७. न्यायविनिश्चय विवरण

Opening : श्रोमज्ज्ञानमयोदयोन्नतपदव्यक्तोविविक्तं जगत्
कुर्वन्सर्वतनूमदीक्षामक्षसर्वैविश्वं बचो रश्मिभिः ।।
व्यातन्वन्भुवि भव्यलोक नलिनी षंडेश्वरखंडश्रियं
श्रेयः शाश्वतमातनोतु भवतां देवोजिनार्हन्यतिः ।।१।।

Closing : व्याख्यानरत्नमालेयं प्रस्फुरन्नयदीधितिः ।
क्रियतां हृदि विद्वद्भिस्तुदतीमानसं तमः ।।

Colophon : श्रीमान्सिंह महीपतेः परिषधि प्रख्यातवादोन्नतिः
तर्कन्यायतमोघ्नतोदयगिरिः सारस्वतः श्री निधिः ।।
शिष्य श्रीमतिसागरस्य विदुषां पत्युस्तपः श्रीभृतां
भर्तुः सिंहपुरेश्वरो विजयते स्याद्वादविद्यापतिः।।
इत्याचार्यवर्यस्याद्वादविद्यापति विरचितायां न्यायविनिश्चय-तात्पर्यविद्योतिन्यां व्याख्यानरत्नमालायां तृतीयः प्रस्तावः समाप्तः ।।
समाप्तं च शास्त्रम् । ॐ नमो वीतरागाय ॐ नमः सिद्धेभ्यः । करकृत-मपराधं क्षन्तुमर्हन्ति सन्तः । ६ ।शाके १८३२ वर्तमानसा-धारण नाम संवत्सरे उदयगयने वसंतऋतौ चैत्रे मासे कृष्णपक्षे द्वाद-श्यां भार्गववासरे मध्याह्नसमये समाप्तोऽयं ग्रंथः । इदंपुस्तकं ३६ पी प्रांत दुर्ग्रग्रामवासिना फुंडा जेमरावंटे इत्युपनामक रामकृष्णशा-स्त्रीणां लिखितम् ।।
श्री सन् १२१०-५-७ ।।

४६८. परीक्षामुखवचनिका

Opening : श्रीमत् वीर जिनेश रवि, तम अज्ञान नशाय ।
शिव पथ बरतायो जगति, वंदौं मैं तसु पाय ।।

Closing : अष्टादशतसाठिलय विक्रम संवत माँहि ।
सुकल असाढ़ सु चोथि बुध पूरण करी सुचाहि ।।

Colophon : इति परीक्षामुख जैनन्यायप्रकरण की लघुवृत्ति प्रमेयरत्न-माला की देशभाषामय वचनिका जयचंद छाबड़ा कृत संपूर्ण । संवत् १६२७ मिती पौहोवदी १ । श्री ।

४६९. परीक्षामुखवचनिका

Opening : देखें—क्र० ४६४।

Closing : देखें—क्र० ४६४।

Colophon : इति परीक्षामुख जैनन्याय प्रकरण की लघुवृत्ति प्रमेयरत्नमाला की देशभाषामय वचनिका जयचंद्र छावड़ा कृता समाप्ता। संवत् १९६२ वैशाख कृष्णा ५ पंचमी सोमवासरे। शुभं भवतु।

४७०. प्रमाणलक्षण

Opening : सिद्धधाम महारिमोहहननं कीर्तेः परं मंदिरम्,
मिथ्यात्वप्रतिपक्षमक्षयसुखं संशीति विध्वंसनम्।
सर्वप्राणिहितं प्रभेंदु वचनं सिद्धं प्रमालक्षणम्,
संतश्चेतसि चिंतयंतु सततं श्री वर्धमानं जिनम्॥

Closing : .... तत्कालभावी—उत्तरकालभावी वा विज्ञानप्रमाणता हेतुः न भावस्तत्कालभाविक्वचिन्मिथ्यात्वज्ञानेपि तस्य भावात् अथोत्तरकालभावि—स किं ज्ञातोऽज्ञातो न तावदज्ञा॥

Colophon : नहीं है।

४७१. प्रमाण मीमांसा

Opening : अनन्तदर्शनज्ञानवीर्यानन्दमयात्मने।
नमोऽर्हते कृत्याकृत्य धर्मतीर्थायितायिने॥

Closing : यतो न विज्ञातस्वरूपस्यास्यवलंबनं जयाय प्रभवति न चाविज्ञातस्वरूपं परतंत्रं भेत्तु शक्यमित्याह।

Colophon : इति प्रमाणमीमांसा ग्रन्थः। मिती श्रावण कृष्णा १० संवत् १९८७।

४७२. प्रमाणप्रमेय

Opening : तत्त्रिकालवर्त्यशेषवस्तुक्रमव्यापि केवलं सकलप्रत्यक्षम्॥

Closing : स्पर्शरसगंधरूपाः शब्दसंख्याविभागसंयोगो परिमाणं च प्रथक्त्वं तथा परत्वापेच? समाप्तं श्रीरस्तुः॥

Colophon : इदं पुस्तकं परिधाविनाम संवत्सरे दक्षिणायने ग्रीष्मऋतौ निज आषाढ़मासे कृष्णपक्षे दशम्यां गुरुवासरे दिवा दश घटिकायां वेणुपुरस्थित पन्नैचारी मठस्थ श्रीपति अर्चक गौड़सारस्वत ब्राह्मन् विदवत् षट्कर्मी वेदमूर्त्तिवामननाम शर्मणस्य पंचमात्मजः केशवनाम शर्म्मणेन लिखितमिति । समाप्तमित्यर्थः श्रीरस्तु । श्री पंचगुरुभ्यः वीतरागाय नमः ।

नयी लिपि में—यह ग्रन्थ वीर निर्वाण संवत् २४४० में लिखा गया ।

४७३. प्रमाण-प्रमेय-कलिका

Opening : जयंति निर्जिताशेषसर्वथैकान्तनीतयः ।
सत्यवाक्याधिपाः शश्वद्विद्यानंदाविजिनेश्वराः ॥

Closing : ननु यद्येवं कथमेकाधिपत्यं न भवतीति चेत्, इत्यत्राप्युक्तं समंतभद्राचार्यैः ।

कालः कलिर्वा कलुषाशयो वा श्रोतुः प्रवक्तुर्वचनात्ययो वा ।
त्वच्छासनैकाधिपतित्वलक्ष्मी प्रभुत्वशक्तेरपवादहेतुः ॥

Colophon : इति श्री नरेन्द्रसेनविरचिता प्रमाणप्रमेयकलिका समाप्ता । लिप्यकृतशुभचिंतक जेठ्यकदयाचंदमहात्मा । शुभमस्तु । मिति भादवा प्रथमशुक्लपक्षे छठि रविवासरे संवत् १८७१ का ।

जैन सिद्धान्त भवन, आरा के लिए प्रतिलिपि की गई । शुभमिति मार्गशीर्ष शुक्ला द्वादशी १२ चन्द्रवार विक्रम संवत् १९९१ । हस्ताक्षर रोशनलाल जैन । इति ।

देखें—जि. र. को., पृ. २६८ ।
दि. जि. ग्र. र., पृ. ९८ ।
रा. सू. II, पृ. १९८ ।

४७४. प्रमेयकमल मार्तण्ड

Opening : देखें—क्र० ४७० ।

Closing : इति श्री प्रभाचंदविरचिते प्रमेयकमलमार्त्तण्डे परीक्षामुखालकारे षष्ठ: परिच्छेद: संपूर्ण ॥

Colophon : गंभीरनिखिलार्थगोचरमलं शिष्यप्रबोधप्रदं
यद्व्यक्तं पदमद्वितीयमखिलं माणिक्य नन्दी प्रभो: ।
तद्व्याख्यातमदोयथागमत: किंचन्मया लेशत:
स्थेया(?) द्बुधियां मनोरथतिगृहे चद्रार्कतारावधि ॥
मोहध्वांतविनाशनो निखिलतो विज्ञानबुद्धिप्रदो
मेयानंतनभोविसर्पणपटुर्वस्तु ·· विभाभासुर:
शिष्याञ्चप्रतिवोधने समुदितो योग्रेपरीक्षामुखा-
ज्जीयात् सोत्र निबंधरावसुचिर मार्तण्डतुल्गोमल्प: ॥२॥
गुरु: श्री नंदि माणिक्यनंदिताशेषसज्जन:
नदता हरितैकंनर आर्जनमती ?र्वं ॥

श्री पद्मनंदिसिद्धांमतिशिष्योनेकगुणालय: प्रमाचंद्राश्चिरं जीया ··· ··· ।
पदेरत: इति श्री प्रमेयकमलमार्त्तण्ड: संपूर्णतामगमत् ।
मिति प्रथमजेठा सुदी ६ सनीचरवार सवत् १८६६ का संपूर्ण हुवो ग्रंथ

विशेष —बाबू श्रीमंधरदास आरेवाले की पोथी है ।

देखें —दि० जि० ग्र० र०, पृ० ६८ ।
जि० र० को०, पृ० २३८, २६६ ।
प्र० जै० सा०, पृ० १७७ ।
रा० सू० II, पृ० १६८ ।
Catg. of skt. & pkt. Ms., P. 671.
Catg. of skt. Ms., P. 306.

४७५. प्रमेयकमलमार्त्तण्ड

Opening : सिद्धं धर्ममहारिमोहहननं कीर्त्तै: परं मन्दिरं
मिथ्यात्वप्रतिपक्षमक्षयसुखं संशीतिविध्वंसनम् ॥
सर्वप्राणिहितं प्रभेन्दुभवनं सिद्धं प्रमालक्षणं
सन्तश्चेतसि चिन्तयन्तु सततं श्री वर्द्धमानं जिनम् ॥२॥

Closing : यत्नुशास्त्रान्तरद्वारेणापगतहेयोपादेयस्वरूपो म तं प्रतीत्यर्थ: ॥
इति ॥

Colophon : इति श्री प्रभाचन्द्राचार्यविरचिते प्रमेयकमलमार्त्तण्डे परीक्षामुखालंकारे षष्ठ: परिच्छेद: ॥

४७६. प्रमेयकण्ठिका

Opening : श्रीवर्द्धमानमानम्य विष्णु विश्वसृजं हरम् ।
परीक्षामुखसूत्रस्य ग्रन्थस्यार्थं विवृण्महे ॥१॥
अथ स्वापूर्वार्थव्यवसायात्मक ज्ञानं प्रमाणमिति प्रमाणलक्षणं बाधातीतं साम्यव्युत्किशतबाधितत्वात् । ननु स्वापूर्वार्थेतिलक्षणे यानि विशेषणान्युपात्ताविनानि निर्थकानीतिचेन्न परप्रतिपादितानेकदूषणवारकत्वेन तेषां सार्थकत्वात् ।

Closing : प्रमेयकण्ठिका जीयात्प्रसिद्धानेकसद्गुणा
लसन्मार्त्तण्डसाम्राज्ययौवराज्यस्य कण्ठिका ॥
सनिष्कलङ्कं जनयन्तु तर्कं वा बाधितर्को मम तर्करत्ने ।
केनानिश ह्यष्कृत: कलङ्कश्चन्द्रस्य किं भूषणकारणं न ॥

Colophon : क्रोधन संवत्सरे माघमासे कृष्णचतुर्दश्यायं विजयचंद्रेण जैन क्षत्रियेण । श्री शांतिवर्णिविरचिता प्रमेयकठिका लिखित्वा समापिता ॥
॥ भद्रभूयात् वर्द्धतां जिनशासनम् ॥

४७७. प्रमेयरत्नमाला

Opening : अनुपलब्ध ।

Closing : तस्योपरोधवशतो विशदोरुकीर्तिर्माणिक्यनंदिकृतशास्त्रमगाधबोध: ॥
स्पष्टीकृत कतिपयैर्वचनैरुदारैर्बालप्रबोधकरमेतदनत विधै: ॥

Colophon : इति प्रमेयरत्नमालापरनामधेया परीक्षामुखलघुवृत्ति: समाप्ता: ॥ शुभम् संवत् १९६३ चै० शुक्ल लि० पं० सीतारामशास्त्रि ॥

देखें, Catg. of Skt. & Pkt. Ms., P. 671.
Catg. Skt. Ms , P. 306.

४७८. प्रमेयरत्नमाला (न्यायमणिदीपिका)

Opening : श्री वर्द्धमानमकलंकमनंतवीर्यमाणिक्यनंदि-
यतिभाषितशास्त्रवृत्तिम् ।।
भक्त्या प्रभेंदुरचिता लघुवृत्तिदृष्ट्या नत्वा यथा-
विधिवृणोमि लघुप्रपंचम् ।।१।।

Closing : स्याद्वादनीतिकांतामुखलोकन मुरगसौख्यामि वंतः ।।
न्यायमणिदीपिकां हृदा सागारे प्रवर्त्तयन्तु बुधाः ।। ।।

Colophon : इति परीक्षामुखलघुवृत्तेः प्रमेयरत्नमाला नामधेयप्रसिद्धायां न्यायमणिदीपिकायाम् संज्ञायां टीकायां षष्ठ परिच्छेदः ।। श्री वीत-रागाय नमः । श्रीमद्महाकलंक मुनये नमः । श्रीमद्वेदशास्त्रसंपन्न मूडबिदे दक्षिण कन्नडापन्ने च्वारि (रिधत) वेदमूर्तिवामनमहस्यपुत्र-लक्ष्मणभट्टेन लिखितमिदं पुस्तकं परिधावि संवत्सरे भाद्रपद ५ कुजवासरे संपूर्णश्च ।।

४७९. प्रमेयरत्नमाला-अर्थप्रकाशिका

Opening : श्रीमन्नेमिजिनेन्द्रस्य वन्दित्वा पादपङ्कजम् ।
प्रमेयरत्नमालार्थः संक्षेपेण विविच्यते ।।१।।
प्रमेयरत्नमालायाः व्याख्यास्सन्ति सहस्रश. ।
तथापि पण्डिताचार्यकृतिर्ग्राह्यैव कोविदैः ।।२।।

Closing : सर्वदाशक्यपदं शक्यरूपार्थबोधकमिति ज्ञानमित्थं भूतनया-भासमित्यत्र विस्तरः । सम्पूर्णं मंगलमहा श्री ।।

Colophon : स्वस्ति श्रीमन्सुरासुरवृंदवं दितपाद योज श्री मन्नेमीश्व रसमुत्पत्ति पवित्रीकृत गौतमगोत्र समुद्भूतार्हन् द्विज श्रीब्रह्मसूरि शास्त्रि तनुज श्री मद्दोर्बलिजिन दास शास्त्रिणामंतेवासिना । मेरु गिरि गोत्रोत्पन्न । त्रि । विजय चंद्राभिधेन जैन क्षत्रिणा लेखीति ।। भद्रं भूयात् ।।

४८०. षड्दर्शन प्रमाण प्रमेयानुप्रवेश

Opening : साद्यनन्तं समाख्यातं व्यक्तानन्तचतुष्टयम् ।
त्रैलोक्ये यस्य साम्राज्यं तस्मै तीर्थकृते नमः ।।

Closing : जयति सुभचंद्रदेवः कण्डूगणपुण्डरीकवनमार्तण्डः ।
चण्डालचण्डदूरो सिद्धान्तपयोधिपारगोबुधाविनुतः ॥

Colophon : इति समाप्तः शुभं भवतात् वर्धतां जिनशासनम् । इत्ययंग्रंथः दक्षिण कर्णाटके मूडबिद्री निवासिना राजू॰ नेमिराजाख्येन लिखितस्स-मात्रश्चस्मिन् दिने ॥ रक्ताक्षिसं । माघशुक्ल द्वादशी ॥

४८१. चिन्तामणिवृत्ति

Opening : श्रियं कियाद्वः सर्वज्ञज्ञानज्योतिरनश्वरीम् ।
विश्वं प्रकाशयच्चिंतामणिश्चिंतार्थसाधनम् ॥

Closing : किं भोजको गच्छति तुल्यकर्तृक इति किं इच्छामि बवान् क्रियायां तदर्थाभिमिति किं इच्छा न भुक्ते ॥

Colophon : इति श्री श्रुतकेवलिदेशीयाचार्य शाकटायनकृतौ शब्दानुशासने चिंतामणौ वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तोध्यायश्चतुर्थः ॥ स्याद्वादाधिपशाकटायनमहाचार्य प्रणीतस्यय शब्दानुशासनस्य महतीवृत्ति-स्समाहृत्यताम् ।

प्रेक्षातिक्षम यक्षवर्मरचिता वृत्तिर्लघीयस्यऽसौ ।
श्री चिंतामणिसंज्ञिकाविजयतामाचंद्रतारं भुवि ॥

श्रीमते शाकटायनाचार्याय नमः॥श्रीयक्षवर्माचार्याय नमः

दक्षिणकर्नाटदेशे कार्कल दुर्गग्रामे शके १८३२ स्य वर्तमाने साधारणनाम संवत्सरे मार्गशीर्ष कृष्णे अष्टम्यायां स्थिरवासरे लिखितोऽयं ग्रन्थः । फुंडाजेरामकृष्णशास्त्रिणः पुत्रेण रंगनाथ शास्त्रिणा अस्मद्गुरवे नमः । लक्ष्मीसेन गुरुभ्यो नमः ।

देखें—Catg of Skt. & Pkt. Ms., P. 694.

४८२. धातुपाठ

Opening : श्री विद्याप्रकृति नत्वा चिमं शब्दानुशासने ॥
मूलप्रकृति पाठोऽयं क्रियार्थगणसिद्धये ॥ ''॥

Closing : ... ... एकादशेति शब्दानुशासने धातवो मताः ॥
धातुपाठ समाप्तः । श्रीकल्याणकीर्तिमुनये नमः

४८३. हेमचन्द्रकोष

Opening : इमनालोइ इम प्रत्ययांतमल प्रयांतं नाम पुल्लिंग । इनम् प्रतिधिमा प्रदिमाश्रुतिम्यद्रठिमा इत्यादि । तथा निवसिद्ध इम न ग्रहण-माचाशदिरिति नपुंसक च बाधमार्थ ।

Closing : यशोक्समत्रसद्धिल्लो कतएव विशंयं लिगं शिष्या लोकाश्रय आल्लिमस्येतिबान ता संख्याईतियुंष्मदरमस्चस्फरंजिगका: पदवाक्यमव्य-यंचित्य संख्यं च तछ हुलर विपुला निस्वाप नाम लिकानुशासनाम्यभि समीक्ष्य संख्या क्षप्पत । आचार्य हेमचन्द्र समद्मदनुशासनांन लिगानां ।

Colophon : इत्याचार्य श्री हेमचंद्रविरचितं स्वोपज्ञलिंगानुशासन विवरण समाप्त: ।।

विशेष—यह ग्रन्थ पूर्णत: जीर्णशीर्ण अवस्था में है । अत: इसके सभी अक्षर स्पष्ट पढ़े नहीं जा सकते है ।

देखें—(१) दि. जि. ग्र र., पृ. १०१ ।
(२) जि. र. को., पृ. ४६२ ।

४८४. जैनेन्द्रव्याकरण महावृत्ति

Opening : प्रारम्भ के ७९ पत्र नहीं है ।

Closing : चतुष्टयं समन्तभद्रस्य ।।१२४।। फगोह इत्यादि चतुष्टय समन्तभद्राचार्यस्य मतेन भवति, नान्येषां, तथाचैवोदाहृतम् ।

Colophon : इत्यभयनंदिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ पचमस्या-ध्यायस्य चतुर्थपाद: समाप्त: । समाप्तश्चपचमोध्याय: । मगलमस्तु । इति श्री जैनेन्द्रव्याकरणग्रन्थ । आरे मध्ये लिपायितं जैनधर्मीशुभकर्मीबाबू कन्हैयालाल तस्यात्मज बाबू श्रीमन्दिरदास निजपरोपकारार्थं लिपिकृत देवकुमारलालभक्त कायस्थ शुभ मिति आषाढ़ सुदी सप्तमी सोमवार संवत् १९०७ । श्रीरस्तु कल्याणमस्तु ।

देखें—(१) दि. जि. ग्र. र., पृ. १०२ ।
(२) जि. र. को., पृ. १४६ (I) ।
(३) प्र० जै० सा०, पृ० १४८ ।
(४) आ० सू० पृ० ६४ ।
(५) रा. सू. II, पृ. २५७ ।
(५) रा. सू. III, पृ. ८७ ।
(६) Catg. of Skt. & Pkt. Ms., P. 645.

४८५. जैनेन्द्र व्याकरण महावृत्ति

Opening : लक्ष्मीरात्यंतिकीयस्य निरवद्यावभासते ।
देवनंदितपूजेशे नमस्तस्मै स्वयंभुवे ॥

Closing : शरोऽहरि खे २३ ॥

Colophon : इत्यभयनंदिविरचितायां जैनेन्द्रमहावृत्तौ पंचमस्याध्यस्य चतुर्थः पाद समाप्तः । शुभमस्तु मंगलमस्तु ।

४८६/१. जैनेन्द्र व्याकरण महावृत्ति

Opening : Missing.

Closing : कुयोह इत्यादिचतुष्टयं समंतभद्राचार्यस्य मतेन भवति नान्येषां तथाचेवोदाहृतम् ।

Colophon : इत्यभयनंदिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ पंचमस्या-ध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चायं पंचमोध्यायः ॥

४८६।२. कातन्त्र विस्तार

Opening : जिनेश्वरं नमस्कृत्य गौतमं तदनन्तरम् ।
सुगमः क्रियतेऽस्माभिरयं कातंत्रविस्तरः ॥

Closing : .... सणे तद्धिते वृद्धिरागमो वा भवति । न्यंकोरिदंन्यांकवं नैयंकवं ।

Colophon : इति श्री मत्कर्णदेवोपाध्यायश्रीवर्धमानविरचिते कातत्रविस्तरे तद्धिते दशमप्रकरणं समाप्तमिति ।

परिसमाप्तोऽयं कातंत्रविस्तरो नाम ग्रन्थो माघवकृष्णाष्टम्यां लिखित्वा मया रानू नामधेयेन । सन् १६२८ ।

४८७. पंचसन्धि व्याकरण

Opening : प्रणम्य परमात्मानं बालधी वृद्धिसिद्धये ।
सारस्वतीमृजुकुर्व्वेपि क्रियां नातिविस्तराम् ॥

Closing : भ्रमत् अम्रं रुद्प्रत्ययः ङित्वादिलोपः स्वरहीनं अत्र तकारस्य नाश: प्रथमैकवचनं सि इकार उच्चारणार्थः इति इकारलोपः स्त्रोर्विसर्गः भ्रमन् सन् रौतिशब्दं करोतीति भ्रमर. इति सिद्धम् ।

Colophon : इति विसर्ग संधि: । पंचसंधि पूर्ण जातम् । इति सारस्वत पंचसंधि संपूर्णम् ।

४८८. प्राकृत व्याकरण (२ अध्याय)

Opening : अत्र प्रणम्य सर्वज्ञं विद्यानंदास्पदप्रदम् ।
पूज्यपादं प्रवक्ष्यामि प्राकृतव्याकृतस्सताम् ।।

Closing : ....एक्केक्कं एक्केक्के एअंगंगस्मिरसेआरत: अत: अकारांताद् लिङ्गात् परस्य स्यादि ।

Colophon : अनुपलब्ध ।

४८९. रूपसिद्धि व्याकरण

Opening : श्री वीरममलं पूर्णधी दृग्वीर्यसुखात्मकम् ।
नत्वा देवमबाधोक्तिं रूपसिद्धि हितां ब्रुवे ।।

Closing : इवन इति दीर्घ: । अधिजिगांसते व्याकरणं । इत्यादि समस्तं संप्रबंचं शब्दानुशासनं विद्वद्भिरुन्नेतव्यम् ।

Colophon : इति रूपसिद्धि: समाप्त: । श्री कृष्नार्पणं श्री गुंमटनाथाय नम: । इति धातुप्रत्ययसिद्धि:
व्याकरणोधमो नीत्वा प्राप्तु ज्ञानसुखामृतम् ।
बालानामृजुमार्गोयं संक्षेपेण प्रदर्शित: ।।
दयापालकृता स्रग्वत् रूपसिद्धि प्रवर्धताम् ।
भूमावदित्तमो भेत्ति विपुलो (लो) भानु रश्मिवत् ।।
जिननाथाय नम: ।

४९०. सरस्वती प्रक्रिया

Opening : ... ... आव् भवति स्वरे परे पौ अक:, पावक:... ... ।

Closing : अचलाद्रोहयग्रीव: कमलाकरईश्वर: ।
सुरासुरनराकारमधुपापीतपत्कज: ।।

Colophon : इति श्री सरस्वती प्रक्रिया समाप्ता ।
संवत् १८०९ वर्षे मार्ग वदी ४ शुक्रे लिखितं पंडित श्री हेमरामेन स्व पठनार्थम् । शुभं भवतु ।

४६१. सिद्धान्त चन्द्रिका

Opening : नमस्कृत्य महेशानं .... ।
वर्णप्रतीतिसूत्राणां, कुर्व्वे सिद्धान्तचन्द्रिका ।

Closing : ... ... ककारादि फो वा रेफः रकारः लोकाच्छे षषस्य सिद्धिर्यथ्यामातरा दे ।

Colophon : इति श्री रामचंद्राश्रम विरचितायां सिद्धान्तचन्द्रिका सम्पूर्णम् ।
अदृष्टिदोषात् मतिविभ्रमाच्च यदर्थहीनं लिषतं मयात्र ।
तत्साधुमुख्यैरपि शोधनीयं कोपो न कार्यः खलु लेषकायः ।।
यादृषं पुस्तकं .... ।।
वाचनाचार्यवर्यधुर्यज्ञानकुशलगणिः तत्शिष्यप्रशिष्यपंडितो-त्तमपंडित श्री ज्ञानसिंहगणिः शिष्य धनजी लिषतं । श्री मेदणी तटमध्ये ।

देखें—(१) दि० जि० ग्र० र०, पृ० १०६ ।
(२) रा० सू० II, पृ० २६, २६४ ।
(३) रा० सू० III, पृ० २३१ ।
(४) आ० सू०, पृ० १४२ ।
(५) जि. र. को., पृ. ४३६ (II) ।

४६२. तद्धित प्रक्रिया

Opening : .... आआ एऐ औ एते वृद्धिसंज्ञकाः भवन्ति ।

Closing : ... संख्यायां द्वितयं, त्रितयं, द्वयं शेषानिपात्या। कृत्यात्तयाः कृति यति तति ।

Opening : इति तद्धितप्रक्रिया समाप्ता ।

४६३. धनञ्जयकोष

Opening : तन्नमामि परं ज्योतिरवाङ्मनसगोचरम् ।
उन्मूलयत्यविद्यां यत् विद्यामुन्मीलयत्यपि ।।

Closing : अर्हंसिद्धमितिद्वाभ्यर्हंसिद्धाभिधायिनैः ।
अर्हदादिनापि प्राहुः शरणोत्तममंगलान् ॥

Colophon : नहीं है ।
देखें—Catg. of Skt. & Pkt. Ms., P. 654.

४६४. नाममाला

Opening : बंदौं श्री परमातमा, वरसावन निजपंथ ।
तसु प्रसाद भाषा करौं, नाम मालिका ग्रन्थ ॥

Closing : संवत् अष्टादश लिषो, ता ऊपर उनतीस ।
वासों दे भादौं सुदी, वातेचतुरदशीश ॥

Colophon : इति श्री देवीदास कृत नाममालिका सम्पूर्णम् । संवत् १८७३ बैशाख वदी २ आदि वारे ।

४६५. शारदीयाख्यनाममाला

Opening : प्रणम्य परमात्मानं सच्चिदानंदमीश्वरम् ।
ग्रथनाम्यहं नाममालां मालामिवमनोरमाम् ।

Closing : भूद्वीपवर्षसरिदद्रिनभः समुद्रपातालदिक्,
ज्वलनवायु वनानि यावत् ।
यावन्मुदं वितरतो भूवितरतो भुवि पुष्पवंतो,
तावस्थिरां विजयतां वतु नामालामिमा ॥

Colophon : इति श्री शारदीयाख्यनाममाला समाप्ता ।
संवत् १८२८ वर्षे मासोत्त (मे) मासे बैशाखमासे कृष्णपक्ष-पंचम्या गुरुवासरे गोपाचलमध्ये लिखितमाचार्य संकलकीर्ति स्वहस्थे । श्रीरस्तु । कल्याणमस्तु । शुभंभवतु ।
एकाक्षर परमदातारो ज्योगुरु नयैव मन्यते ।
स्वानज्यौन्यसतं गत्वा चौकालो शुभजायते ॥
देखें—(१) दि० जि० ग्र० र०, पृ० १११ ।
(२) जि० र० को०, पृ० ३३५ ।
(३) Catg. of Skt. & Pkt. Ms, P. 695.

४९६. शारदीयाख्यनाममाला

Opening : देखें—क्र० ४६३ ।

Closing : देखें,—क्र० ४६३ ।

Colophon : इति श्री सारदीयाख्य लघु नाममाला समाप्तम् । संवत् १९१८ मासानां मासोत्तममासे मार्गशिर मासे शुभेशुक्लपक्षे तिथौ षष्ठी भृगुवासरे लिपीकृतं ब्राह्मण रामगोपालेन वासी मौजपुर को लीखी रामगढ़-मध्ये । शुभमस्तु ।

४९७. शारदीयाख्यनाममाला

Opening देखें—क्र० ४६३ ।

Closing : देखें—क्र० ४६३ ।

Colophon : इति श्री सारदीयाख्य नाममाला समाप्तं । सवत् १९८५ का जेष्ट शुक्ला ८ शनिवासरे ।

४९८. त्रेपनक्रियाकोष

Opening : समवसरण लिछिमी सहित वरधमान जिनराय ।
नमो विबुध वंदित चरन भविजन कौं सुखदाय ॥

Closing : जबलौ धर्मजिनेश्वर साह । जगत मांहि वरतै सुखकार ॥
तबलो विसतरिजो ईह ग्रन्थ । भविजन सुर शिव दायक पंथ ॥

Colophon : इति श्री त्रेपनक्रिया भाषा ग्रन्थ सिंघई किसनसिंघ (सिंह) कृत संपूर्णम् । मिती फूंस (पौष) सुदी ११ संवत् १९६१ ।

४९९. त्रेपनक्रिया कोष

Opening : देखें—क्र० ४९६ ।

Closing : देखें—क्र० ४९६ ।

Colophon : इति श्री त्रेपनक्रिया कोस विधान का छंद की जाति का अंक २६१५ एक अधिकार का अंक १०८। श्लोक संख्या टीका शुद्ध । ३००० । तीन हजार के ऊन मान ।

इति श्री क्रियाकोस भाषाग्रन्थ सिंही किसनसिंघ कृत संपूर्णम् श्रीरस्तु ।।

५००. उर्वशीनाममाला

Opening : श्री आदिपुरुष कहिये जगत, जाकी आदि अनंत ।
अगम अगोचर विश्वपति, सो सुमिरो भगवंत ।।

Closing : वक्तासुरगुरुसो हुतो श्रोता हो सुरराज ।
तहुभवन पारन लह्यो कहा औरको काज ।।

Colophon : इति श्री शिरोमणि कृता उर्वशीनाममाला संपूर्ण । शुभंभवतु ।

५०१. विश्वलोचन कोष

Opening : जयति भगवानास्तां धर्म्मः प्रसीदतु भारती,
वहन्तु जयतीप्रेमोद्गारंतरंग्वशुभ जनाः ।

अयमपि ममश्रेयानगुं स्तनोन्नुमनोमुदं
किमधिकमितस्त्यक्तावेगाम् भवन्तु विपश्चितः ।।१।।

Closing : हेहे व्यस्तौ समस्तौ च स्मृत्या मंत्र हूतिषु ।।
हौच हौव समस्तौ व संबुद्धया ध्यानयोर्म्मतौ ।।६६।।

Colophon : इति श्री पंडित श्री श्री धरसेन विरचितायां विश्वलोचन-मित्यपराभिधानायां मुक्तवल्यां नामार्थकांड समाप्तः ।। संवत् ।।१६६१।। वर्षे " ? मासे शुक्लपक्षे .... द्वादशा ? आनंदीयो १३ दिने गुरुवारे ।।

५०२. अलंकारसंग्रह

Opening : जगद्विस्मयजनन जागरूकपदद्वयम् ।
अवियोगरसाभिज्ञमाद्यं मिथुनमाश्रये ।।१।।

Closing : सर्वदोषरहितं सगुणं यत् काव्यमव्ययशकरमूर्ध्याम् ।
स्वच्चारित्रमि बसादुनिषिव्यं मविताविरमनं डरमं डए ।

Colophon : इत्यमृतानंदयोगी प्रवरविरचितेऽलंकारसंग्रहे दोषगुणनिर्णयो नाम षष्ठः परिच्छेदः ॥५२४॥
जुम्ला श्लोक ६६० ।
देखें—जि० र० को०, पृ० १७

५०३. अलंकारसंग्रह

Opening : देखें, क्र० ५०२ ।

Closing : रसोक्तस्यान्यथाव्याख्याराचीचार्या बुद्धिशालिभिः ॥

Colophon : इत्यमृतानदयोगि प्रवरविरचिते अलंकारसंग्रहे वसुनिर्णयो नामाष्टमो अध्याय: ।

करकृतमपराधं क्षंतुमर्हन्तिसंत: ॥
अयमलंकारसंग्रहो नाम ग्रंथ: रानू नेमिराजाख्येन लिखित।
रक्ताक्षिमं माघमासे शुलपक्षे द्वितीयां तिथौ समाप्तश्च ॥

५०४. बारहमासा

Opening : अलिरी भर नेमपिया बिनमैं नर होरी ।
प्रथ(म)लियो नहि मन समुकाय ।
नाहक पठयो है लगन लिषाय ॥

Closing : जेठ संपूरन बारहमास, नेम लियो सिवथान नेवास ।
रजमति सुरपद पाई विख्यात, सागरबुध कहत यह बात ॥

Colophon : बारहमासा संपूरनं ।

५०५. चन्द्रोन्मीलन

Opening : चंद्रप्रभं नमस्कृत्य चंद्राभं चंद्रलांच्छनम् ॥
चंद्रोन्मीलनकं वक्ष्ये, सकलाद्यं चराचरम् ।

Closing : यत् लभ्यते तत्संवत्सर आदित्य वर्द्धितप्रश्ना-
दित्यं लभ्यते ।
चंद्रवर्द्धितप्रश्ना चंद्रं लभ्यते,
क्षितिजवर्द्धित प्रश्ना भौमं लभ्यते ॥

Colophon : इति चंद्रोन्मील्नं समाप्तं ।

देखें--जि० र० को० पृ०, १२१

५०६. चन्द्रोन्मीलन

Opening : देखें, क्र० ५०५ ।

Closing : .... एव चन्द्रमा से चन्द्रलोक की प्राप्ति और भौम से भौम लोक की प्राप्ति कहना चाहिए ।

Colophon : इति चन्द्रोन्मीलनं समाप्तम् । शुभ भवतु ।
शुभमिति फाल्गुन शुक्ला ५ सं० १६६० ।

देखें--जि० र० को०, पृ० १२१ ।

५०७. चन्द्रोन्मीलन

Opening : देखें, क्र० ५०५ ।

Closing : देखें, क्र० ५०६ ।

Colophon : इति चन्द्रोन्मीलनं समाप्तम् ।

५०८. दोहावली

Opening : जिनके वचन विनोद ते प्रगटे शिवपुर राह ।
ते जिनेन्द्र मंगल करो नितप्रति नयो उछाह ॥१॥

Closing : सो सम्यक्त सहित बने व्रत संयम सम्बन्ध ।
सो उपमा सांची फबे सोना और सुगन्ध ॥

Colophon : नहीं है ।

५०६. फुटकर कवित्त

Opening : भौ (भव) जल माहि परयो चिर जीव सदीव
अतीत अनागत माठी।
राग विरोध विमोह उदै बहु कर्मप्रकृति लगि
अति गाठी ॥

Closing : ... . ? अस्पष्ट।

Colophon : इति कवित्तानि।

५१०: फुटकर कवित्त

Opening : देखें, क्र० ५०६।

